# Acknowledgement

## निवेदनम् ।

सुविदितं तत्र भवतां यत् प्राचीन समये महर्षि जैमिनि जैमिनिसूत्रमिति ज्योतिषग्रन्थं प्रणिनाय ।

अस्मिन् ग्रन्थे अध्यायचतुष्टयं वर्तते । प्रत्येकस्मिन्नध्याये पादचतुष्टय-मुपनिबद्धमस्ति । ग्रन्थोऽयं ज्योतिर्विज्ञाने इतिहासे शंशोधकानां समाजे वर्गे चातीव महत्त्वपूर्णोऽस्मिन् वर्तमाने कालेऽतीवोपयोगीति निःशङ्कम् । होराशास्त्रे महर्षिणा पाराशरेण, वराहमिहिराचार्येण, श्री वैद्यनाथेन, जीवनाथेन, कल्याणवर्मणा, नीलकण्ठाचार्येणेत्यादिभिरनेकैः संशोधकैः जैमिनिसूत्रमवलम्ब्य स्वरचितग्रन्थेषु कतिचित् ज्योतिषविषयाः प्रतिपादिताः ।

जैमिनीय सूत्रस्य टीकाकाराः ।

१- श्री रा० र० कानजी मयाशंकर द्विवेदी कृत ।
प्रसिद्धकर्ता पंडित ज्येष्ठाराम मुकुन्दाजी, संस्कृत पुस्तकालय, मुंबई ।
निर्णयसागरे मुद्रितम् । संवत् १९५३ । सन् १८९७ ।

२- ज्योतिर्विन्नीलकण्ठविरचित सुबोधिनी टीका प्रथमध्यायद्वयं सटीकमग्रिमं चाध्यायद्वयमटीकम् पुस्तकम् । खेमराज-श्रीकृष्णदास- मुंबई ।
श्री वेंकटेश्वर स्टीम प्रेस, मुंबई ।
संवत् १९६९ । शाके १८३४ ।
सन् १९१३ ।

३- ज्योतिषाचार्यं ज्योतिषतीर्थं काशी हिन्दू विश्वविद्यालय प्रधान ज्योतिषाध्यापके झा उपमनामक श्री रामयत्न शर्मणा पुस्तकम् रचितम् । भार्गव बुक डैपो, बनारस । संवत् १९८१ । शाके १८४६ । सन् १९२५ ।

४- जयपुर महाराजाश्रितेन सत्संप्रदायाचार्येण महामहोपाध्यायेन श्री दुर्गाप्रसाद द्विवेदिना निरूपितम् । निर्णयसागर यन्त्रालये मुद्रितम् । संवत् १९८१ । शाके १८४६ । सन् १९२५ ।

५- स्वधर्म धुरन्धर देवसवाचस्पतिना ज्योतिष्पारदृश्वना काशीस्थ मनोरथ सहकारिमण्डली मन्त्रिणा चातुर्मास्य याजिना वैतालोपाभिधेन विनायक शास्त्रिणा विरचितयोपदेशार्थद्योताभिधया व्याख्यया समलंकृतम् पुस्तकमिदं हितचिन्तक नाम्नि यन्त्रालये मुद्रितम् । ज्योतिषमध्यायज्यान्तम् । संवत् १९६८ । शाके १८३३ । सन् १९३२ ।

६- Shri B.V.Raman, Raman Publications,
Banglore
First Ed.1950, Second Ed. 1958.

७- 'बुजस्थ' श्री राधाकृष्ण संस्कृत महाविद्यालय त्रिस्कन्धज्योतिष प्रधानाध्यापक- ज्योतिषाचार्य- साहित्याचार्य- पौष्टाचार्य पदवीक प्राप्त 'रीपन' स्वर्णपदक, पं० श्री अच्युतानन्द झा शर्मणा विरचितेन विमला टीका । संवत् २००८ । शाके १८७३ । सन् १९५२ ।

८- Shri Sunil Kumar Kar
Raman Publications, Banglore,
1st Ed.1955. Adhyayas III & IV.

९- Jaimini Sutras
Prof. B. S. Rao

१०- जैमिनीय पद्धतिः, (मराठी टीका) जातक शिरोमणि खण्ड-१, निर्णय सागर

११- जैमिनि सूत्रम् - पंडित श्री सीताराम झा, मास्टर खेलाडीलाल एण्ड संस, सन् १९३४, वाराणसी, चतुर्थ संस्करण ।

१२- जैमिनिसूत्रम्-आचार्य पं० श्री लषणलाल झा, चौखम्भा अमर भारती प्रकाशन, प्रथम संस्करण, सन् १९८६ ।

इत्यधिकृत्य 'जैमिनीय सूत्रमेकमध्ययनम्' इति नामकेऽस्मिन् महानिबंधे जैमिनीय सूत्राख्यस्य ग्रन्थस्य चत्वारोऽध्याया: श्रीमतां पुरस्तात् समुपस्थाप्यन्ते । अधोनिर्दिष्टानां संशोधने प्रधानबिन्दवो निर्धारिता वर्तन्ते । -

१- प्रास्ताविकम् ।

२- संशोधन समस्या का ? ~~किमर्थं~~ किमर्थं च स्वीकृता वर्तते ? तत्र विशिष्टानि कारणानि ।

३- संशोधन समस्या । तस्याश्च विविधा उद्देशा: । समस्यान्तर्गत पारिभाषिक शब्दानां विवरणम् ।

४- संशोधन पद्धति: निष्कर्षाश्च ।

५- संशोधनकार्य मर्यादा ।

६- सन्दर्भग्रन्थ सूची, परिशिष्टानि च ।

नीलकण्ठाचार्यादारभ्यावार्चीनानां बी० बी० रामन् (रमण) महोदयानां संस्कृत-आङ्ग्लभाष्यसमेतं पुस्तकमधीकृत्य प्रत्येकस्मिन् सूत्रे प्राप्ता: पाठभेदा: अर्थभेदाश्च संकलय्य अन्वेषण समये विभिन्नस्थलेभ्यो विविधानि संप्राप्तानि । आधुनिकानां पण्डितवर्याणां पाठकोपाह्व श्रीनिवासात्मजानां श्री महादेवशर्मणां 'जातक तत्त्वम्' ग्रन्थस्याधारोऽपि प्रधानत्वेन स्वीकृत: ।

## प्रस्तावना ।

सर्वोत्तमं भारतीयं विज्ञानम्, धर्म: तत्त्वज्ञानम्, नाटकानि, ~~सम्भिर्क~~ साहित्यम्, राजनीति:, आख्यानानि इति महर्षीणां सर्जनम् । एते विशिष्टा बौद्धिका आसन् । विश्वस्यान्ये एतेषां समीपे वामना एव । कथमिति वयं न जानीमहे परन्तु तत्र

सत्यं समाविष्टमस्ति । अतएव महर्षीणां मस्तिष्कात् समुत्पन्नं साहित्यमप्रतिमं स्वाभाविकं चेति । अतएव च 'व्यासोच्छिष्टं जगत् सर्वम्' इति सूक्तिः संगच्छते ।

व्यासशिष्यो महर्षि जैमिनिर्महान्बुद्धिमान् वर्तते । तदीयानि सूत्राणि च मूल्यवन्ति । एतानि सूत्राण्येव स्वपरिचयं ददति । तानि 5000 वर्षेभ्योऽपि प्राचीनानि । भारतीयः परदेशीयः च कोऽपि वाचकवर्गः तत्र आदरं मानं च विदधाति। तदध्ययनेन तेजस्वितां च प्राप्नोति । एतादृशि एतानि मूल्यवन्ति रत्नानि सन्ति । तदधिगन्तुं सर्वेषां लोभो वर्तते एव । एतत्सूत्रैः स्वतेजः प्रतिदिनं वर्धितमेव । तेषां सूत्राणां विस्तृत संभृतिमन्तोऽर्थाः संक्षिप्तविवरणे कथयितुमशक्या एव । अतो जिज्ञासुभिः स्वतन्त्रः प्रयत्न आवश्यकः । संस्कृतविदुषां कृतेऽपि सूत्राणि कठिनानि अवलोक्यन्ते । तेऽपि धैर्यस्य भक्तेश्चाभावेन तदवगमाय प्रयत्नं त्यजन्ति एव ।

ज्योतिषम् एकः भव्यः सागरः । यत्र प्रायः लक्षं श्लोका मन्त्राश्च समाविष्टाः । तेषामवबोधाय अतीव प्रयत्नः समयश्च यापनीयः ।

विस्तृत ज्ञानयुक्त साहित्यात् केचन श्लोकाः स्वस्य समग्रं मस्तिष्कस्य सम्पूर्णोपयोगानन्तरं ग्रहीतुं शक्याः । तदनन्तरं ते यथायथमवगन्तुं शक्या भवेयुः । महर्षिजैमिनेः सूत्राणि ज्ञातुमवगन्तुं च तथा क्लिष्टानि यतस्तेषां भाषान्तरं कर्तुं केचन एव साहसं विदध्युः ।

जैमिनिसूत्राणां परिचयविषये नवीनं किमपि कथयितुं दुःशकम् । एतैः सूत्रैः पंचदश शताब्द्यां प्रशंसा प्राप्ता । तेषां सूत्राणां भव्यता निरूपणाय न्याय-प्रदानार्थं च मया यथाशक्ति प्रयतितमस्ति ।

ज्ञानयुक्तानि लघुसूत्राणि रचयितुं अल्पीयसामेव शक्तिर्भवति । आर्यावर्तस्य महर्षय एव तानि विधातुं शक्नुयुः । तत्र च न केवलं वैदुष्यमपेक्ष्यते । ज्योतिर्वि-ज्ञानमप्यत्र अनिवार्यम् । अनुभवात्मको व्यवहारोऽपि अत्र आवश्यकः । वेदस्य षडङ्गेषु ज्योतिषस्य प्राधान्यम् । अस्य ज्ञानमन्तरा वेदा अन्धा एव । वयं भूत- वर्तमान - भविष्याणां स्पष्टं प्रकाशं समीहामहे । देहस्य भौतिक रचनाया विषये जीवनं, वियोगस्तदनन्तरं च कुत्रास्माकं स्थितिः । एतस्मिन् जीवने अस्माकमिच्छाः विचाराश्च के । ध्येये वयं कीदृशीं सिद्धिं प्राप्नुयाम । प्राप्स्याम वा न वा ? ग्रहाणामस्माकमुपरि कीदृक् प्रभावः । वयं तेषां प्रभावान्तर्गता एव । दुरितं कथं निवारितं भवेत् । एतस्मिन् विषयेऽस्माकं प्राचीनैः ज्योतिर्विद्भिः प्रयतितमस्ति।

एतद्विज्ञाने मन्धाना अमन्धानाश्च एतत्सम्बन्धिनो नैकान् प्रश्नान् पृच्छन्ति । एतादृशाः प्रश्ना अत्यावश्यकाः सन्ति । जैमिनिसूत्राणि तादृशि संक्षिप्तानि यादृशि अन्येषां कृते असुलभानि । रचनादृष्ट्या एतानि गूढानि विद्वत्तापूर्णानि विलक्षणानि च सन्ति । विस्वलाभार्थं च महर्षिणा रचितानि । एते सुस्पष्टं भणन्ति यज्जैमिनिलिखितं तदतथ्यम् । यतः तत्पूर्वैः बल- व्यास- पराशर- वशिष्ठ- गर्ग- भृगु- पुलस्त्य- इत्यादिभिः अपि तद्विषयस्य प्रतिपादनं कृतं वर्तते । तत्र मतान्त-राण्यपि सन्ति ।

जैमिनिना यथा ज्योतिषस्य प्रतिपादनं कृतं वर्तते तस्य प्रकाशनं जन्माधार-वाचने शक्तिमत् कुरुते । एतद्विज्ञानेन लग्न- जन्मलग्न- उपपदलग्न- होरालग्न- घटिकालग्न- आरूढलग्न- विलग्न (नक्षत्रलग्न) इत्यादि अवगतं भवति । तद्विज्ञानेन दशा-नवमांशलग्नेषु क्षतयो निवारयितुं शक्यन्ते ।

व्यासरचित ब्रह्मसूत्राणि, उत्तरमीमांसा, पूर्वमीमांसा, गृह्यसूत्र- व्याकरण-विषयकानि सूत्राणि सन्ति । सूत्राणामेतादृशमद्भुतदर्शनं महर्षीणां प्रदानम् । संस्कृतस्य चैतद् वैशिष्ट्यम् । विश्वस्य अन्यासु भाषासु एतादृशं गुम्फनमसम्भवित-मेवास्ति । सूत्राणि गहनानि भवन्ति । परिश्रमेणैव तान्यवगन्तुं शक्यानि । सूत्राणि संक्षिप्तानि भवन्ति । अतः मुखोद्गतानि कर्तुं सुलभानि भवन्ति ।

(२) संशोधन समस्या -

जैमिनिसूत्रेषु बहुभिर्विद्वद्भिष्टीका कृतास्ति । परन्तु एतत्सूत्रग्रन्थे केनापि संशोधनं कृतं न विद्यते । तस्य च कारणं वयमेतद्ब्रूमः यत् प्राचीनकाले शिक्षणस्य आजीविकायाश्च साधनानि नगरपर्यन्तं सीमितान्यासन् । परन्तु वर्तमाने विज्ञानयुगे आजन्म-मरणपर्यन्तं प्रत्येकस्मिन् विषये विविधा, विचित्रता, विशेषता चानुभूयते । वर्तमान विज्ञानयुगे ग्रहाणां गति- स्थिति- दशादिकं विचार्य अनेक संशोधनानि संजातानि सन्ति । एतानि अनुभूत साधनानि जैमिनिसूत्राधारेण महानिबन्धे चर्चितानि सन्ति ।

३- संशोधन समस्या । तस्याश्च विविधा उद्देशाः । समस्यान्तर्गत पारिभाषिक शब्दानां विवरणम् ।

वर्तमान समये जैमिनिसूत्रग्रन्थे अनेक प्रकारकाः संशोधन समस्या राजन्ते । मानवजीवनस्योपरि ग्रहाणां प्रभावः, तेषामार्थिकनैतिक पारलौकिका अनेकाः समस्याः सूत्रद्वारा निराकरण- निवारणादिकं कर्तुं शक्याः । ताश्च ग्रहगणित-क्रियया क्रियन्ते । जगतः विविध प्रकारस्य स्थितेस्तन्निमित्तद्वारा ज्ञातुं शक्यम् ।

(४) संशोधनकार्य मर्यादा -

वर्तमानसमये मानवजीवनं विशेषतः औद्योगिक क्षेत्रेषु प्रगतिशीलं वर्तते ।

अत: मनुष्याणां व्यावसायिक- धार्मिक- आर्थिक- सामाजिक- कौटुम्बिक -नैतिक जीवनं सरलताया अभावे यन्त्रमयं भवति । अत: जीवने सन्तुलताया अभावो दृश्यते । अत: व तच्छान्तये जैमिनीय सूत्राधारेण नैकं मार्गदर्शनमत्र प्रकरणे गुम्फितं वर्तते ।

(५) संशोधन पद्धति: निष्कर्षाश्च -

जैमिनीयसूत्राणामवलोकनेन तथा च तदाधारेण-(१) अनुभवजन्यज्ञानम्, (२) भिन्न-भिन्न टीकाकाराणां मतानि,(३) मतमतान्तरम् तदैकरूपता च, (४) प्राचीनावर्चीन पण्डित विचार विनिमय: । इत्यादि विचार्य प्रकृतमहानिबन्धस्य रचना कृता वर्तते । अत्र लायब्रेरी मैथड, इन्टरव्यू मैथड, डिस्कसन मैथड, पद दृत्या संशोधन विहितमस्ति । संशोधन प्राक्तनानां जैमिनीयसूत्रानन्तरं रचितानां ग्रन्थानां विचारविनिमय: दर्शित: ।

(६) सन्दर्भग्रन्थसूची परिशिष्टानि च -

अस्मिन् संशोधनाविषये आस्माकीनो भिप्राय: निम्न दर्शित: ।

अस्मिन् ग्रन्थे सूत्राण्यतीव गूढानि गहनानि च रहस्यमयामि च सन्ति । अस्मिन् ग्रन्थे सूत्राणामर्थ: क-ट-प-यादि अ कगणनाद्वारा विहित: । ज्यौतिष-शास्त्रज्ञानमन्तरा सूत्राणामर्थो वगन्तुं दु:शक: । सूत्राणां विचारशीलत्वात् अतीव परिश्रमो त्रावश्यक: । जैमिनीयसूत्रप्रतिपादितानां विषयाणां विहंगावलोकनं विधाय भवतां समक्षमस्य महानिबन्धस्य विमर्शिका सविनयं समुपस्थाप्यते ।

अन्ते परिशिष्टानि दर्शितानि । यानि शास्त्रजिज्ञासूनां कृतेऽतीव उपयोगप्रदानि सन्ति ।

अस्मिन् महानिबन्धे अधोनिर्दिष्टा
प्रकरणरचना स्वीकृता
वर्तते ।

प्रास्ताविकम्

प्रथमं प्रकरणम् - जैमिनीयसूत्रग्रन्थस्य प्रथमाध्यायस्य चर्चा ।
द्वितीयं प्रकरणम् - द्वितीयाध्यायस्य चर्चा ।
तृतीयं प्रकरणम् - तृतीयाध्यायस्य चर्चा ।
चतुर्थं प्रकरणम् - चतुर्थाध्यायस्य चर्चा ।
उपसंहारः ।
परिशिष्टानि ।

॥ श्रीरस्तु ॥

।। श्री गणेशाय नमः ।।

# ।। जैमिनीय सूत्रमैकमध्ययनम् ।।

:: महानिबन्धः ::

संशोधक: शुक्ल निरंजन चन्द्रशंकर
प्राध्यापक,
वडोदरा संस्कृत महाविद्यालय, वडोदरा
म०स० विश्वविद्यालय, वडोदरा

मार्गदर्शक : प्रोफेसर डा० प्रभाकर के० डोंगरे,
भूतपूर्व प्रधानाध्यापक,
वडोदरा संस्कृत महाविद्यालय - वडोदरा
तथा
भूतपूर्व डीन, फैकल्टी आफ एजूकेशन एण्ड सायकोलोजी,
म० स० विश्वविद्यालय - वडोदरा ।

॥ श्री गणेश परिवार: ॥




लम्बोदर नमस्तुभ्यं सततं मोदकप्रिय ।
अविघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥

॥ श्री गणेशाय नमः ॥

श्री महाकाल्यै नमः । श्री महालक्ष्म्यै नमः । श्री महासरस्वत्यै नमः ।

हेरम्बमवलम्बेऽहं सर्वविघ्नविनाशकम् ।
सर्वसौख्यप्रदातारं तं नमामि विनायकम् ॥
॥ १ ॥

विद्यागुरून् नमाम्यादौ शारदाम्बां तथैव च ।
पितरौ मे मातुलंच ज्योतिःशास्त्राधिकारिणम् ॥
॥ २ ॥

पंचमं पंचतत्त्वंच षष्ठीं देवीं ततः परम् ।
कुलदेवं सप्तमंच अष्टमं कर्मदैवतम् ॥
॥ ३ ॥

ध्यात्वा नवग्रहान् वन्दे पुरुषार्थप्रदायकान् ।
वाचा च मनसा ह्येतान् मम कार्यस्य सिद्धये ॥
॥ ४ ॥